# संकृतवाता:

**दिनाङ्क :-29.08.2024** **प्रात: - 06:55**

## अथ वार्ता:

### कैबिनेट – औद्योगिकविथि

देशस्य प्रौद्योगिकपरिदृश्यस्य परिवर्तनाय राष्ट्रिय औद्योगिकवीथीविकासकार्यक्रमस्य अन्तर्गतं द्वादश नूतनानि ग्रीनफील्ड औद्योगिक स्मार्ट सिटी इत्येतानी नगराणि अनुमोदितानी। नवदिल्ल्यां मन्त्रिमण्डलसभायाः अनन्तरं वार्ताहरान् सम्बोधयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत् एतेषु औद्योगिकक्षेत्रेषु संयुक्तरूपेण अनुमानितनिवेशः द्वयधिक षड्शतोत्तर अष्टाविंशतिः सहस्र कोटिरूप्यकाणि भविष्यति।_

### राष्ट्रपतिः

राष्ट्रपतिना द्रौपदीमुर्मूः वर्यया देशे महिलानां विरूध्य अपराधानां विषयमालक्ष्य कट्वालेचितम्। सा अवोचत् यत् एषः समयः आगतः यत् सर्वेऽपि मिलित्वा अपराधविरूद्धं आयान्तु। तया उक्तं यत् अद्यत्वे यथा महिलानां विरूद्ध्य अपराधाः वर्धिताः, तथैव सर्वेषां कृते आत्मनिरीक्षणस्यावस्यकता वर्तते।

### क्रीडा दिवसः

अद्य राष्ट्रीय दिवसः अस्ति। देवसोऽयं प्रतिवर्षं अगस्त मासस्य नवविंशे दिनाङके हॉकी क्रीडकस्य मेजर ध्यानचन्दस्य जन्मजयन्त्यवसरे समाचर्यते।

### हेमन्त सोरेन

हेमन्त सोरेन सर्वकारस्य मन्त्रीपदस्य अथ झारखण्ड मुक्ति मोर्चायाः सर्वेभ्यः पदेभ्यः त्यागपत्रं अयच्छत्। तेनोक्तं यत् दलस्यास्य कार्यशैली नीतयः च दलं त्यक्तुं बलं दत्तवन्तः। उच्चशिक्षाविभागं विहाय सोरेन् महोदयः जलसमपदाविभागं अपि घारयति स्म। सोरेन महोदयः भाजपेतिदले सम्मिलितुं सज्जो वर्तते।

### प्रधानमंत्री-जन-धन-योजनायाः

सर्वकारीय-प्रमुख-वित्तीय-समावेश-योजनायाः प्रधानमंत्री-जन-धन-योजनायाः च ह्य दशवर्षाणि पूरितानि। अस्याः योजनायाः अन्तर्गतं त्रिपञ्चाशत् कोटित : अधिकांशत: लाभार्थिनः लाभान्विताः जाताः। प्रधानमन्त्री नरेन्द्रमोदी सर्वेभ्यः लाभार्थिभ्यः अभिनन्दनं कृतवान्, ये योजनैषा सफलं कृतवन्तः तेभ्यः धन्यवादं च दत्तवान्। सामाजिकसञ्जालमाध्यमेन प्रधानमन्त्रिणा उक्तं यत्,

आर्थिकसमावेशं वर्धयितुं, कोटिशः जनानाम्, विशेषतः महिलाभ्यः, युवभ्यः, वंचितवर्गस्य सदस्येभ्यः च सम्मानं प्रदानाय जनधनयोजना सर्वोपरि अभवत्।

**क्रीडा**

चतुः विंशत्यधिक द्विसहस्रतम वर्षस्य पैरालिम्पिक क्रीडायाः आधिकारिक- आरम्भः पेरिस्-नगरे भव्योद्घाटनसमारोहेण अभवत्।

फ्रांस देशस्य राष्ट्रपतिना इमैनुएल मैक्रॉन इत्यनेन उद्घाटन-समारोहस्यास्य घोषणा कृता। अवधेयं यत् क्रीडानां आयोजनं सितम्बर मासस्य अष्टं दिनाङ्कं यावत् भविष्यति। ऐषमः पेरालिम्पिक खेलेषु जगतः चतुः सहस्राधिक क्रीडकाः पदकस्पर्धासु सहभागितां समाचरन्ति।

भारतेन तावत् एतस्यां प्रतियोगितायां सर्वाधिकं बृहत्तमं दलं प्रेषितमस्ति। एतदनु, द्वादशखेलेषु भारतस्य चतुर्शीतिक्रीडकाः स्वीयं अद्भुतं प्रदर्शनं प्रदर्शयिष्यन्ति।

प्रतियोगितायां  एतस्यां उद्घाटनसमारोहे कुन्तकक्षेपकः क्रीडकः सुमित अन्तिलः अथ शॉट-पुट इति खेल क्रीडिका भाग्यश्री जाधवः भारतस्य संयुक्त ध्वजवाहकत्वेन अभवताम्।

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृतजगता सम्बद्धै: विभिन्नै: क्रियाकलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ.एम.गोल्ड-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत:भविष्यति। कृपया श्रृण्वन्तु।

**।। इति वार्ता:।।**